IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# संवर्गेष्टि हौत्र विवरणं

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**यु॒क्ष्वा हि दें॒व॒हूतं॑मा॒ अश्वां अग्नें र॒थीरिंव।**

**नि॒ होतां पू॒र्व्यः संदः॥1**

**अथ 'संवर्गेष्टेः सप्तदशसामिधेन्योऽनभ्यस्ताः ।**

**'युक्ष्वा हि' इत्याद्याः सर्वाः गायत्र्यः ॥2**

**तत्र प्रथमा मन्त्रः– [ युवा हि इति ].**

हे अग्ने, युक्ष्व योजय। छान्दसो लुक् शपः, द्वथचोऽतस्तिङः , इति संहितायां दीर्घत्वम्। देवहूतमान् देवानामाह्वातृ-तमान् अश्वान् व्यापनान् ज्वालासमूहान्। उभयत्रापि दीर्घादटि समानपादे इति रुत्वम्। रथीः इव यथा रथी रथवान् रथे अश्वान् युङ्क्ते। छन्दसीवनिपौ इति मत्वर्थीय ईकारः। ततस्तथायुक्तजालस्त्वं पूर्व्यः पुराणः देवानां यष्टा निषदः निषीद। लेटि व्यत्ययेन शपो लुकिं अडागमः॥

**दशमे शंयुवाकश्च पत्नीसंयाजकाः श्रुताः।**

**या दर्शपूर्णमासाख्या सेष्टिरत्र समापिता॥3**

अथैकादशे संवर्गेष्टिद्धौत्रमन्त्रा अभिधीयन्ते ननु सत्यं प्रपद्ये, इत्यादिक एको हौत्रकाण्डः। उभा वामिन्द्रानी इत्यादिरन्त्यानुवाकात्मकोऽपरः। तयोर्मध्ये युक्ष्वा हि इत्यनुवाको न समाम्नातः। तत् कथमस्य हौत्रत्वम्। समाख्ययेति वदामः। यथा तयोः काण्डयोः याज्ञिकानां समाख्यया हौत्रत्वं एवमस्याप्यनुवाकस्येति द्रष्टम्यम्। अत एवाऽऽपस्तम्ब आह अग्नये संवर्गाय पुरोडाशमष्टाकपालम् इत्युक्तं ( क्त्वा ) युक्ष्वा हि देवहूतमानिति पञ्चदश सामिधेनीरन्वाह। नित्यया परिदधाति। कुवित्सु नो गविष्टय इति याज्यानुवाक्ये। यस्याजुषद्विम्ना हि त इति संयाज्ये इति। नित्यया आ जुहोत दुवस्यत इत्यनयेत्यर्थः॥

**युवा इति॥ तत्र प्रथमाया -**

सामिधेन्याः पाठस्तु - युवा हि देवहूतमा अश्वार अने रथीरिव। नि होता पूर्व्यः सदः इति॥ हे अझे, त्वं देवहूतमान् देवानामतिशयेनाह्वातन् युव योजय। हिशब्दः प्रसिद्धवाची। प्रसिद्धेऽस्मिन् कर्मणीत्यर्थः। योजने दृष्टान्तः - रथीः अश्वान् इव इति। रथस्वामी यथा अश्वान् योजयति तद्वत्। किं च त्वं पूर्व्यः पुरातनः होता होमोत्पादको भूत्वा निषदः अस्मिन् यागस्थाने निषीद॥

**उत नों देव देवा ँ अच्छा वोचो विदुष्टरः।**

**श्रद्विश्वा वार्या कृधि ॥4**

**त्व७ह यद्यविष्ठ्य सहसः सूनवाहुत।**

**ऋतावां यज्ञियो भुवः ॥5**

**अथ द्वितीया – 'उत नः' इति॥**

हे देव दीप्तिमन्, अग्ने, अस्माकं कर्माणि देवान् अच्छ वोचः आभिमुख्येन ब्रूहि भ्रातृव्यानभिभवितुम्। एते सम्यग्यजन्त इति। छान्दसो निपातस्य च इत्यच्छेत्यस्य संहितायां दीर्घत्वम्। विदुष्टरः विद्वत्तरः। अयस्मयादित्वेन भत्वात् संप्रसारणम्। किं च विश्वानि वार्याणि वरणीयानि अभिप्रेतानि भ्रातृव्यमरणादीनि श्रत् कृधि सत्यानि कुरु। यथाभिमतसंपत्तिः सत्यम्। करोतेर्लेटि छान्दसः शपो लुक्। श्रुशृणुपृकृवृभ्यः इति धिभावः॥

**उतेति॥ अथ द्वितीया-**

उत नो देव देवा५ अच्छा वोचो विदुष्टरः। श्रद्विश्वा वार्या कृधि इति।। अपच हे देव अग्ने, त्वं विदुष्टरः अतिशयेनास्मदभिप्रायं विद्वान् देवान् प्रति अच्छा आभिमुख्येन गत्वा यजमानो हविर्दास्यतीति वोचः ब्रूहि। विश्वा वार्या सर्वाणि वरणीयान्यस्मदभि- प्रेतानि श्रत् कृषि श्रद्धेयानि विश्वसनीयानि यथा भवन्ति तथा कुरु॥

**तृतीया मन्त्रः — 'त्वम्' इति॥**

हे यविष्ठ्य युवतम। छान्दसः स्वार्थिको यत्। सहसः बलस्य सूनो मथनप्रभवत्वात्। हे आहुत नित्यमाभिमुख्येनाहुत। सुबामन्त्रिते इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य पदादित्वात् षाष्टिकमामन्त्रिता - दात्तत्वं; परस्य त्वाष्टमिकमामन्त्रितानुदात्तत्वम्। यत् यस्मात्।ऋतावा सत्यवान् यज्ञवान् वा। तस्मादस्माकमपि यज्ञियः यज्ञसंपादनार्हः भुवः भव। त्वमेव तथा भवितुमर्हसीति। भवतेर्लेटि शपो लुकि अडागमे "भूसुवोस्तिङि"

**त्वमिति॥ अथ तृतीया –**

त्व ह यद्यविष्ठ्य सहसः सूनवाहुत। ऋतावा यज्ञियो भुवः इति॥ हे विष्य युवतम, हे सहसः सूनो बलस्य पुत्र, मधनशक्त्योत्पन्नत्वात् बलपुत्रत्वम्। हे आहुत देवानामाह्वातः, त्वं हं त्वमेव यत् यस्मात् ऋतावा सत्यवांस्तस्मात् यज्ञियः भुवः यज्ञसाधको भव॥

**अयमग्निः संहस्रिणो वाजस्य शतिनस्पतिः।**

**मूर्धा कवीरंयुणाम्॥6**

**तं नेममृभयों यथाऽऽ नंमस्य सहंतिभिः।**

**नेदीयो यज्ञमं (१) ङ्गिरः॥7**

**चतुर्थी मन्त्रः — 'अयम् इति'॥**

अयं खलु अग्निः पतिः स्वामी रयीणां सर्वधनानां, तस्मादिहैव समिन्धयाम इति। अग्निरिदानीं विशेष्यते - सहस्रिणः शतिनः च शतप्रमाण- वतः सहस्रप्रमाणवतश्च वाजस्य अन्नस्य पतिः स्वामी, अत एव मूर्धा प्रधानभूतः कविः क्रान्तदर्शनः। तस्मादयं रयीणां दाताऽस्त्विति भावः। रयीणामित्यत्र "नामन्यतरस्याम्" इति विभक्तेरुदात्तत्वम्॥

**अयमिति॥ अथ चतुर्थी** -

अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणाम्  इति॥ अयं समिध्यमानः अभिः सहस्रसंख्याकस्य शतसंख्याकस्य - च - वाजस्य अन्नस्य पतिः अत एव मूर्धा शिरोवदुत्तमः कविः विद्वान् रयीणां धनानां दाता भवतु॥

**पञ्चमी मन्त्रः** –

"'तं नेमिम्' इति"॥ हे अग्ने, नेदीयः अन्तिकतमः सदा अस्माकं प्रत्यासन्नः अङ्गिरः अङ्गनादिगुणयुक्त तम् इमम् यज्ञम् आनमस्व अस्मान् प्रति प्रह्वीभूतं कुरु। अस्मदभिमतसंपादनोन्मुखं कुरु। सहूतिभिः समानाह्वानैः सहायैः सह। यद्वा - नेदीयः अन्तिकतममानमस्व। यथा ऋभवः देवतक्षाणः नेमिं नीयमानम् आवर्तयन्ति — तद्वद्यज्ञमानमयेति। अन्तर्भावितण्यर्थस्य व्यत्ययेनात्मनेपदम्।"यथेति पादान्ते" इति यथेत्यस्य निघातः॥

**तमिति॥ अथ पञ्चमी**-

तं नेमिमृभवो यथा नमस्व सहूतिभिः। नेदीयो यज्ञमङ्गिरः इति॥ हे अङ्गिरः अङ्गसौष्ठवयुक्ताने, समाना हूतिर्देवानामाह्वानं येषामृत्विजां ते सहूतयस्तैः सहूतिभिः युक्तस्त्वं तं यज्ञम् अस्माकं नेदीयः अत्यन्तसमीपं प्रति आनमस्व आनीय वशं कुरु। तत्र दृष्टान्तः – ऋभवः नेमिं यथा इति। यथा देवतक्षाणो रथचक्रस्य नेमिमानीय स्ववशत्वेन परिभ्राम्यमाणां कुर्वन्ति तद्वत्॥

**तस्मैं नूनमभिद्यंवे वाचा बंरूप नित्यंया।**

**वृष्णें चोदस्व सुष्टुतिम्॥8**

**कमुं वदुस्यु सेनंयाऽग्नेरपांचक्षसः।**

**पुर्ण गोषुं स्तरामहे।।9**

**षष्ठी मन्त्रः – 'तस्मै' इति।**

नूनम् इति पादपूरणे। हे अग्ने विरूप नानारूप तस्मै यज्ञैराराधनीयाय अभिद्यवे अभिगतदीप्तये वृष्णे वर्षित्रे इन्द्राय इन्द्रार्थं वाचा नित्यया वैदिक्या ऋगादिरूपया सुष्टुतिं शोभनां स्तुतिं शोभनस्तुतिकं वा यज्ञं चोदस्व प्रेरय पुनः पुनः प्रवर्तय। यद्वा-आभीक्ष्ण्यं नित्यत्वं, यथा नित्यप्रहसित इति ; पुनः पुनः प्रवर्तमानया वाचा सुष्टुतिं प्रवर्तयेति। यथा पुनः पुनः स्तुवीत यजमानः तथा धनादिना समृद्धं कुर्विति। सुष्टुतिशब्देन गतिसमासे "मनूक्तिन्व्याख्यान" इत्यादिना उत्तरपदान्तोदात्तत्वम्। बहुव्रीहौ छान्दसं षत्वम्।कश्चिदाह — तस्मै यजमानाय हविषां वर्षित्रे पुनः पुनः यज्ञं  प्रवर्तयेति॥

**तस्मा इति॥ अथ षष्ठी** –

तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम्  इति ॥ हे विरूप विविधरूपयुक्ताने, अभिद्यवे सर्वतो द्योतमानाय वृष्णे कामानां वर्षयित्रे तस्मै यष्टव्याय देवाय नित्यया वैदिकमन्त्ररूपया वाचा अस्माभिः क्रियमाणां सुष्टुतिं शोभनां स्तुतिं नूनं २० चोदस्व सर्वथा प्रेरय तदग्रे कथयेत्यर्थः ॥

**सप्तमी मन्त्रः – 'कमु ष्वित्' इति॥**

कम् इति प्रश्ने, उ इत्यवधारणे, स्वित् इति वितर्के। अस्य अग्नेः अपाकचक्षसः अनल्पदर्शनस्य प्रवृद्धज्ञानस्य सेनया बलसंपत्त्या कमेव उ खलु पणि सांव्यवहारिकं क्रयविक्रयादानभोगादिलक्षणं - गोषु गवादिधनविषयेषु  स्तरामहे छादयामः। न किञ्चिदपि, सर्वमपि व्यवहारं कुर्मः  एव । पण व्यवहारे, औणादिकः इप्रत्ययः, स्तृणातेर्विकरणव्यत्ययेन शप्, स्विदित्यस्य छान्दसं षत्वम् ॥

**कमिति॥ अथ सप्तमी –**

कमु ष्विदस्य सेनयाऽग्नेरपाकचक्षसः। पणिं गोषु स्तराम हे इति॥ पाकोऽल्पः। चक्षो ज्ञानम्। अपाकं चक्षो यस्यासावपाकचक्षाः सर्वज्ञ इत्यर्थः। सर्वं जानतः अस्य अग्नेः सेनया परिचारकजनेन सह गोषु गवादिद्रव्यविषये कम् उ पणि स्तरामहे स्वित् कं नाम व्यवहारमाच्छादयामः। एतदीयं परिचारकजनं वञ्चयित्वा न कोऽपि व्यवहारोऽस्माभिः कर्तुं शक्यते। तस्मात् सर्वमपि व्यवहारमस्यानुग्रहेणैव कुर्म इत्यर्थः ॥

**मा नों देवानां विशः प्रस्नातीरिंवोस्राः।**

**कृशं न हसुरभिंियाः॥ 10**

**मा नंः समस्य दृढ्यः परिंद्वेषसो अहतिः।**

**ऊर्मिर्न नावमा वंधीत्॥ 11**

**अष्टमी मन्त्रः -'मा नः' इति॥**

देवानां हविर्व्यवहारिणां यजमानानां संबन्धिन्यः विशः प्रजाः ऋत्विजो वा नः अस्मान् मा हासुः मा त्याक्षुः, प्रस्नातीः प्रस्नात्यः प्रस्तुताः उस्राः गाः इव अहन्तव्याः अघ्नियाः। यद्वा - अघ्निया इति गवां नाम। उस्राः क्षीरादिदानेन जगतां वासयित्र्यः। कमिव? कृशं न वत्समिव प्रस्तुतस्तन्यः हि गावो वत्सकं विशेषेण न जहति। एवम् अस्मान् मा हासिषुरिति। उभयोपमार्थीयाऽपि वाक्यार्थे- पमा भवतीत्युपमैतत् ॥

**मेति॥ अथाष्टमी –**

'मा नो देवानां विशः प्रस्नातीरिवोस्राः। कृशं न हासुरनियाः' इति॥ देवानां संबन्धिन्यः विशः वाणिज्यकारिण्यः प्रजा नः अस्मान् मा हासुः नैव परित्यक्तवत्यः। का इव ? प्रस्नातीः प्रस्नुवत्यः उस्राः क्षीरादिप्रदानेन वासहेतवः अम्रियाः इव गाव इव। कमिव ? कृशं न अल्पवयस्कं वत्समिव। यथा क्षीरपूर्णस्तनयुक्ता गावः शिशुं वत्सं न त्यजन्ति तद्वदित्यर्थः॥

**नवमी मन्त्रः–'मा नः' इति॥**

समस्य सर्वस्यापि दूढ्यः द्रढीयः । पृषोदरादिः । परिद्वेषसः सर्वतो द्वेषणशीलस्य भ्रातृव्यस्य अहतिः अभिभवः नः अस्मान् मा वधीत् माऽस्मानवधिषुः । नावं दुर्बला ऊर्मिः इव । कश्चिदाह - समस्य समानस्य दूढ्यः मत्सरिणः । समानमन्यत् ॥

**अथ नवमी – 'मा नः समस्य दूढयः परिद्वेषसो अहतिः।**

ऊर्मिर्न नावमा वधीत्' इति॥ समस्य अस्माभिः समानस्य दूढयः दुर्धियः परिद्वेषसः सर्वतो द्वेषं कुर्वतः शत्रोः अहतिः अस्मासु कृतो द्रोहः नः अस्मान् आ समन्तात् मा वधीत्। कां केव? नावम् ऊर्मिः न। यथा नद्यां गच्छन्तीं नावमूर्भिर्न विनाशयति तद्वद्वैरिकृतो द्रोहोऽस्मान् मा विनाशयतु| सर्वशब्दपर्यायो वाऽयं समशब्दः, सर्वस्य वैरिणो द्रोहो मा विनाशयतु॥

**नमंस्ते अग्न ओजंसे गृणन्ति देव कृष्टयंः।**

**अमैंर् ( २ ) मित्रमर्दय॥ 12**

**कुवित्सु नो गविंष्टयेऽग्ने संवेषिषो रयिम्।**

**उरुंकृदुरु णंस्कृधि॥ 13**

**दशमी मन्त्रः- नमस्ते इति॥**

हे अग्ने, नमः, ते तव खलु ओजसे बलाय कृष्टयः मनुष्याः गुणन्ति शब्दयन्ति। तवैव बलं स्तुवन्ति यजमानादयः। अतः त्वम् अमित्रम् अस्माकमपकारिणं शत्रुम् अमैः अमनैः रोगादिभिः अर्दय मारय। अमेरित्रप्रत्ययः। अन्यत्र पचाद्यचि वृषादिः द्रष्टव्यः॥

**नम इति॥ अथ दशमी –**

नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः। अमैरमित्रमर्दय इति॥ हे देव अग्ने, कृष्टयः मनुष्याः ते तव ओजसे बलाय नमः गृणन्ति नमस्कारवाचिनं शब्द प्रयुञ्जते यजमानादयस्त्वदीयं बलं नमस्कुर्वन्तीत्यर्थः। अतस्त्वम् अमित्रम् अस्माकमपकारिणम् अर्दय २० मारय, अमैः रोगादिभिः॥

**एकादशी मन्त्रः– कुवित्सु इति॥**

हे अग्ने, नः अस्माकं रयिं धनं सु संवेविषः सुष्ठु समन्तात्। प्रापय। कुवित् इति निपातो भूयिष्ठमित्यस्यार्थे वर्तते। विष्लृ व्याप्तौ। लेटि सिब्बहुलं लेटि इति सिप् प्रत्ययः। लेटोऽडाटौ इत्यडागमः। गविष्टये गावश्च इष्टयश्च गविष्टिः, तदर्थं तत्साधनानि कर्माणि मे स्युरिति। लिङ्गव्यत्ययः छान्दसः, नुमभावो वा छान्दसः। उत्तमबहुलधनं प्रापयेति। इदानीं तत्प्रापितं बहुतरं कुर्वित्याशास्ते – उरुकृत् उरुणो बहुनो धनस्य कर्तुः, न हि त्वमल्पं कर्तुं जानासि। पादादित्वात् षाष्ठिकमामन्त्रितायुदात्तत्वम्। नः अस्माकं धनभू उरु कृधि बहुतरं कुरु। सामर्थ्यातिशयो गम्यते। नश्च धातुस्थोरुषुभ्यः इति नसो णत्वम्, कः करत्करति॰ इति सत्वम्। करोतेर्लेट्, पूर्ववच्छपो लुक्, धिभावश्च॥

**कुविदिति॥**

एवं दश सामिधेनीरुक्त्वा पुरोनुवाक्यामाह - कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम्। उरुकृदुरु णस्कृधि इति॥ हे अग्ने, त्वं नः अस्माकं रयिं धनं कुवित् बाहुल्यं यथा भवति तथा सुष्ठु संवेषिषः सम्यग्प्यातमकरोः। किमर्थम् ? गविष्टये गोभिः सहितेष्टिर्गविष्टिस्तदर्थम् उरुकृत् प्रभूतकारी त्वं नः अस्मदीयं कर्मफलम् उरु कृधि प्रभूतं कुरु ॥

**मा नों अ॒स्मिन् मंहाध॒ने परां वभां॒र॒भृद्यंथा।**

**स॒ंवर्ग स ँ र॒यिं जंय॥ 14**

**अ॒न्यम॒स्मद्रि॒या इ॒यमग्ने॒ सिषंक्तु दुच्छुनां।**

**वर्धंनो॒ अमंव॒च्छवंः ॥15**

**द्वादशी मन्त्रः –मा नः इति।**

उक्तं महत्तरं धनं देहीति तत्र महाधने त्वया अस्मिन् दीयमाने इत्थं कर्तव्यम्। भारभृदिति। मा परावर्क् मा परानैषीः। यथा महान्तं भारं बोढुं समर्थो भारं न इति न किंचित् परावर्जयति महान्तमपि भारमानयति। एवं त्वयाऽपि कर्तव्यम्। बृजेर्लेटि मन्त्रे घस इति च्लेर्लुक्। किं च- संवर्गम् संवृज्य संवृज्य देये धनराशौ पुनः पुनः समानीय महान्तं धनराशिं संजय सम्यक् जित्वा आनय। वर्जेराभीक्ष्ण्ये णमुल्।छान्दसो वा घमुञ्॥

**मेति॥**

अथ याज्यामाह - मा नो अस्मिन् महाधने परा वग्र्भारभृद्यथा । संवर्ग स५ रयिं जय इति ॥ नः अस्मभ्यं त्वया दत्ते अस्मिन् महाधने मा परावर्क पराभवकारणं वर्जनं विनाशनं २० मा कुरु । तत्र दृष्टान्तः -- भारभृत् यथा इति । लोके यथा भारवाही बलीवर्दादिर्द्रव्यादिकं न नाशयति तद्वत्। किं च, संवर्ग ४२- संवृज्य संवृज्य देये धनराशौ पुनः पुनः समानीय रयिं संजय प्रभूतं धनं सम्यक् प्रापय ॥

**त्रयोदशी मन्त्रः- अन्यम् इति॥**

हे अग्ने, अस्मत् अस्मत्तः अन्यं शत्रुम् इयं दुच्छुना दौर्गत्यं दुर्भिक्षं नरकादिरूपा वा पीडा सिषक्त सेवताम्। सचेर्लोटि "बहुलं छन्दास" इति शपः लुः; इत्वं चाभ्यासस्य। भियै भयार्थं यथाऽसौ भीतः पलायेत। नः अस्माकं तुं शवः बलं वर्धय। अमवत् अमसाधनः भ्रातृव्यक्षयो यैस्तद्वत् बलं वर्धय। अणावकर्मकात् इति परस्मैपदम्। "छन्दस्युभयथा" इति शप आर्धधातुकत्वाणिलोपः, द्वयचोऽतस्तिङः इति संहितायां दीर्घत्वम् ॥

**अन्यमिति ॥**

तत्रैव विकल्पितां यांज्यामाह - अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना । वर्धा नो अमवच्छवः इति॥ हे अग्ने इयं दुच्छुना रोगरूपा दारिद्र्यरूपाऽनेकरूपा वा पीडा अस्मत्

**यस्याजुंषन्नमुस्विनः शमुमदुर्मखस्य वा।**

**तं घेदुग्निर्वृधाऽवंति॥ 16**

**चतुर्दशी मन्त्रः – 'यस्य' इति॥**

यस्य नमस्विनः अन्नवतः पुरोडाशादिहविः संपादिनो यजमानस्य शमीं कर्म अजुषत् सेवते प्रीतो भजते। कीदृशस्य अदुर्मखस्य अविगुणयज्ञस्य, तमेवाग्निः वृधा वर्धनेन अवति तर्पयति। प्रवृद्धं वा रक्षति। घेदिति पादपूरणे। केचिदाहुः-नमस्विनो नमस्कारशीलस्य वा अविगुणयज्ञस्य वा कर्मेति विकल्पार्थो वाशब्द इति। घेति इदित्यवधारणे पादपूरणे॥ अन्यं सिषक्तु अस्मत्तो व्यतिरिक्तं वैरिणं संबध्नातु। किमर्थम् ? मियै भीत्यर्थम्। यथा पीडया वैरी भीतः पलायते तथा पीडां प्राप्नोतु। नः अस्माकं शवः वर्ध बलं वर्धय। किंवत्? अमवत्, यथा वैरिणः अमः रोगो वर्धेत तद्वत्॥

**यस्येति॥**

अथ स्विष्टकृतः पुरोनुवाक्यामाह -- यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा। तं घेदग्निर्वृधाऽवति इति॥ दुष्टोऽङ्गविकलो मखो यज्ञो दुर्मखः। न विद्यते दुर्मखो यस्य यजमानस्य सोऽय- मदुर्मखः सम्यगनुष्ठितयज्ञ इत्यर्थः, तस्य, नमस्विनः भक्त्या नमस्कुर्वतः यस्य यजमानस्य शमी २० सुखकरी माहुतिम् अजुषत् अग्निः असेवत। अदुर्मखस्य सम्यगनुष्ठायिनः वा यस्य यजमानस्य शमीम- जुषत् तं घेत् तमेवोभयं नमस्कुर्वन्तं सम्यगनुतिष्ठन्तं वाऽयम् अग्निः वृधा धनादिवर्धनेन अवति रक्षति॥

**परंस्या अधिं (३) संवतोऽवंराँ अभ्या तंर।**

**यंत्राहमस्मि ता अव॥17**

**विद्मा हि तें पुरा वयमग्नें पितुर्यथाऽवंसः।**

**अथां ते सुम्नमींमहे॥18**

**पञ्चदशी मन्त्रः– परस्याः इति॥**

[ परस्याः ] संवतः संगतेः अधि उपरि परमे संश्लेषे तिष्ठन्। उपसर्गच्छन्दसि इति वतिः। अवरान् अपकृष्टानप्यस्मान् अभ्यातर आभिमुख्येन, मर्यादया च तर तारय दुःखात्। वनोतेः संपदादित्वात् क्विप्। परस्मात् संवननीयात् लोकादुपरि वर्तमानः त्वं अवरानस्मान् अभ्यातर आभिमुख्येनागच्छ। तथा कृत्वा यत्र अहम् अस्मि कुले ग्रामे जनपदे वा काले वा तान् तत्स्थानपि सर्वान् अत्र रक्ष तर्पय वा। रुत्वानुनासिकौ उक्तौ॥

**परस्या इति**॥

तत्रैव विकल्पितां पुरोनुवाक्यामाह - परस्या अधि संवतोऽघरा अभ्या तर। यत्राहमस्मि ता५ अव इति॥ सम्यग्वनुते देवान् भजते यस्यां क्रियायां सा क्रिया संवत्, परस्याः संवतः अधि उत्कृष्टाया अस्या इष्टेरधिष्ठानम् अवरान् निकृष्टामप्यस्मान् अभ्यातर आमि मुख्येन गत्य दुःखानि नाशय। यत्रयेषु बन्धुषु अहम् अस्मि तान् बन्धूनपि - अव रक्ष॥

**षोडशी मन्त्रः - विद्म इति॥**

हे अग्ने तस्मात् ते तव पुरा पूर्वमेव वयं जानीमः। कथमिव? अवसः अभिगन्तव्यः - पितरमिव त्वा वयं जानीमः क्रमागतो रक्षकः त्वमस्माकं पितुरेवं ते वयं जानीमः। पुत्रद्वेषितव्यावृत्त्यर्थमिदम्। अध अत एव कारणात् ते त्वामेत्र सुम्नं सुखम् ईमहे याचामहे। द्वयचोऽतस्तिङः इति, निपातस्य च इति उभयत्रापि दीर्घत्वम्॥

**विद्मेति**॥

अथ स्विष्टकृतो याज्यामाह - विद्मा हि ते पुरा वयमग्ने पितुर्यथाऽवसः। अधा ते सुम्नमीमहे इति॥ हे अग्ने, हि यस्मात् पुरा वयं ते तव अवसः रक्षणं विश जानीमः। कस्येव ? पितुः यथा, -लोके पुत्रः यथा पितुः पालनं जानाति अध तस्मात् कारणात् तेसुम्नम् ईमहे त्वया संपादितं सुखं प्राप्नुमः॥

**य उ॒ग्र इ॑व शर्य॒हा ति॒ि॒ग्मशं॑यो॒ न वसं॑गः।**

**अग्ने॒ पुरौ रुरोर्जिथ ||19**

**सखा॑य॒ सं व॑ः: सम्यञ्चमिष स्तोमें चा॒ग्नयें।**

**वर्षिष्ठाय क्षिती॒नामू॒र्जो नप्त्रे॒ सहं॑स्व॒ते||20**

**सप्तदशी मन्त्रः – 'यः' इति॥**

हे अग्ने यः त्वम् उग्रः उद्गूर्णबलतया उग्रः इव भवसि। शर्यहा। छान्दसः कर्तरि कृत्यः,तत्र साधुः इति वा यत्। शर्याणां हिंसकानां हन्ता शर्यहा। तिग्मश्रृङ्गः न तीक्ष्णश्रृङ्गः तीक्ष्णज्वाल : तिग्मश्रृङ्ग इव। व७सगः वननीयानि वनानि गच्छति वनसंग :। वननीयेषु वनेषु सक्त इति वा सगः। पृषोदरादित्वादिष्टस्वरूपलाभः। एवं मृगवत् सौम्यस्वभाव उग्रत्वभावश्च त्वं पुरः असुराणां पुरीः मेघान् वा रुरोजिथ अधक्षीः। छान्दसो हः। भ्रातृव्याणां हन्ता, वृष्टेरुत्पादनेन वा सर्वाभिमतकारी॥

**य इति**॥

अथात्र तिस्र ऋच उपहोमार्थाः। तत्रेयं प्रथमा- य उग्र इव शर्यहा तिग्मश्रृङ्गो न वज्रसगः। अग्ने पुरो रुरोजिथ इति॥ हे अग्ने, यः त्वम् उग्रः इव क्रूरो राजेव शर्या शर्याणां हिंसकानां हन्ता, तिग्मश्रृङ्गः न तीक्ष्णश्रृङ्गो मृग इव, वरसगः, वंसानि वनानिगच्छतीति वंसगः, दावाग्निरूपो भूत्वा वनेषु तिष्ठसीत्यर्थः। तादृशस्त्वं पुरः रुरोजिथ शत्रूणां पुराणि तर्जितवानसि ||अथास्यामेवेष्ट्यां पुरोऽनुवाक्या- 'सखायः' इत्यनुष्टुप्॥ हे सखायः समानख्यानाः ऋत्विग्यजमानाः वः युष्मदर्थं युष्माकं श्रेयोऽर्थम् अस्मासु अग्नये वर्षिष्ठाय प्रवृद्धतमाय क्षितीनां।

**सखाय इति॥ अथ द्वितीया** –

सखायः सं वः सम्यञ्चमिषर स्तोमं चाग्नये। वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते इति॥ हे सखायः, परस्परसख्ययुक्ता ऋत्विग्यजमानाः, वः युष्माकं सम्यञ्चम् इषं समीचीनम् अपि अभीष्टार्थम् [अग्नि] संपादयतु। समित्युपसर्गस्यापेक्षितः शेषः अध्याहृतः। यूयं च अग्नये स्तोमं स्तोत्रं संपादयत। कीदृशायामये? क्षितीनां निवासहेतूनां मध्ये वर्षिष्ठाय वृद्धतमाय, ऊर्जः नप्त्रे बलस्य न पातयित्रे विनाशनमकुर्वते, सहस्वते स्वयमतिशयेन बलवते॥

**स ँसुमिद्युंवसे वृषुन्न(४)ग्ने विश्वांन्युर्य आ ।**

**इुडस्पुदे समिंध्यसे स नो वसुन्या भंर ॥21**

निवासहेतूनां मध्ये ऊर्जः नप्त्रे चतुर्थाय ; यथा - अन्नादाहुतिः आहुतेरादित्यः आदित्या- दग्निः इति। सहस्वते अतिशयेन बलबते ईदृशायास्मै सम्यश्चं समीचीनम् अतिगुणं स्तोमं स्तोत्रम् इषम् अन्नं पुरोडाशादिकं हविः च समारभध्वम् कुरुत। एतक्रियायां अश्रुतत्वात् साकाङ्क्षत्वादुपसर्गसामर्थ्यादुत्तरस्मिंश्च मन्त्रे विशेषस्य श्रुतत्वात् । तत्रायं विवेकः – अग्नये इषं स्तोमं च संहराम इत्यत्रोच्यते । सोऽग्निरस्मभ्यं विश्वानि वसूनि समाहरत्विति उत्तरत्र वक्ष्यत इति। प्रियस्थिरादिना वृद्धशब्दस्य वर्षादेशः॥

**अथात्रैव याज्या** –

ससमित् इत्यनुष्टुप्॥ प्रसमुपोढः इति द्विर्वचनम्। हे वृषन् कामानां वर्णितः अग्ने, विश्वानि वसूनि धनानि भक्तैः संयुवसे संमिश्रयसि भक्तेभ्यो वा दातुं राशीकरोषि। व्यत्ययेन शः आत्मनेपदं च। यस्मात् अर्यः ईश्वरः त्वम्। आकारो मर्यादायाम्। मर्यादा असंकरेण यथाऽधिकारं धनानां प्रापयिता त्वमिति। किं च- इडः पदे पृथिव्याः पदे स्थाने वेद्याः समिध्य से सम्यक् ज्वाल्यसे। सः तादृशः महानुभावस्त्वम् अस्मभ्यं वसूनि समाभर समाहरेति। ग्रहोर्भर छन्दसि। इडन्नं तद्वती पृथिवी। मत्वर्थीयो लुप्यते, अयस्मयादित्वेन पदत्वाज्जश्त्वं; सावेकाचः इति विभक्तेरुदात्तत्वम् ; षष्ठ्याः पतिपुत्र ं इत्यादिना सत्वम्॥

**स समिति** ||

अथ तृतीया – 'सरसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ। इडस्पदे समिध्य स नो वसून्या भर' इति॥ हे वृषन् कामानां वर्षक अने, विश्वानि सर्वाणि फलानि संसम् इत् संपाद्य संपाद्यैव युवसे यजमानेन मिश्रयसि। अर्य आ ईश्वरस्त्वमागत्य इडः पदे पृथिवीरूपाया वेद्याः स्थाने समिध्यसे सभ्यग्ज्वाल्यसे। सः तादृशः महानुभावो त्वं नः अस्मभ्यं वसूनि धनानि समाभर सम्यगाहृत्य प्रयच्छ॥

**प्रजापते स वेद सोमांपृषणे मौ देवौ ॥ ११ ॥ 22**

यः प्रजाकामः स्यात् तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत् इत्यस्याः पुरोऽनुवाक्या- प्रजापते न त्वत् इति त्रिष्टुप् ॥ व्याख्यातेयं – सोमस्य विषिरसि इत्यत्र। इह त्वस्याः प्रतीकं गृह्यते। हे प्रजापते, वदन्यः एतानि विश्वानि जातानि भुवनानि परिबभूव सर्वतो व्याप्नोति। तस्माद्यद्यत् कामयमानाः ते जुहुमः वयं तत् तथैवास्माकम् अस्तु। वयं रयीणां पतयः स्याम इति॥

**तत्रैव याज्या** –

'स वेद पुत्रः' इति जगती॥ इयमपि – "हिरण्यगर्भः" इत्यत्र व्याख्याता। प्रतीकग्रहणमिदमस्याः। सः एव प्रजापतिः पुत्रः भूत्वा पितरं मातरं च वेद पुत्रभावेन वर्तते। सः एव सूनुः सोता यजमानश्च भवति। सः एव पुनर्मधः पुनः पुनः क्रियमाणो यागश्च भवति| सः एव द्यां स्वर्गं च और्णो त्स्वतेजसा आच्छादयति, सः एव विश्वानि भूतजातानि अभवत्, आऽभवत् व्याप्नोति सः एवेति ॥

यः पशुकामः स्यात् तस्मा एतं सोमापौष्णं गार्मुतं चरुं निर्वपेत् इत्यस्य पुरोऽनुवाक्या - सोमापूषणा जनना रयीणाम् इति त्रिष्टुप्॥ इयं च व्याख्याता अग्नाविष्णू महि इत्यत्र। प्रतीकग्रहणमस्या अप्यत्र। सोमापूषणौ रयीणां धनानां जनना जनयितारौ

द्यावापृथिव्योश्च जनयितारौ। विश्वस्यभूतस्य जातस्य जातमात्रावेव गोपौ पालकौ । एवं महानुभावाविमौ देवाः अकृण्वन् कृतवन्तः अमृतत्वस्य नाभि नहनभूतौ देवाः कृतवन्तः॥

**प्रजापत इति॥**

“यः प्रजाकामः स्यात् तस्मा एवं प्राजापत्यं गार्मुतं चरुं निर्वपेत्”, “यः पशुकामः स्यात् तस्मा एत्र सोमापौष्णं गार्मुतं चरुं निर्वपेत्” इत्यनयोर्याज्यानुवाक्या-प्रतीकानि दर्शयति—प्रजापते स वेद सोमापूषेणेमौ देवौ इति॥ प्रजापते न त्वदेतान्यन्यः इति प्रजार्थस्य हविषः पुरोनुवाक्या। सा च सोमस्य त्विषिरसि इत्यनुवाके व्याख्याता। स वेद पुत्रः पितरम् इत्येषा याज्या। सा च हिरण्यगर्भ आपो छ यत् इत्यस्मिन्ननुवाके व्याख्याता। पश्वर्थस्य हविषः सोमापूषणा जनना इति पुरोनुवाक्या। इमौ देवौ जायमानौ इति याज्या। एतदुभयम् अग्नाविष्णू महि इत्यस्मिन्ननुवाके व्याख्यातम्॥

**अथ तत्रैव याज्या** –

‘इमौ देवो जायमाना’ इति त्रिष्टुप्॥ इयमपि तत्रैव व्याख्याता। प्रतीकमेव गृह्यते। इमौ देवो सोमापूषणौ जायमानौ एव जुषन्त, सर्वे देवाः इमौ देवौं तमांसि अजुष्टानि अप्रियाणि गूहतां जातमात्रावेव छादितवन्तौ। आभ्यां पक्षम् उदकं संवत्सरव्रतम् आमासु उस्त्रियासु रश्मिषु इन्द्रः वृष्ट्यर्थं जनत् जनयति पक्कं करोति॥

इति द्वितीये षष्ठे एकादशोऽनुवाकः॥

याज्यापुरोनुवाक्यापाठादयो धर्मा ऋग्वेदे प्रोक्ताः। दोहननिर्वापादयो यजुर्वेदे| आज्य-स्तोत्रपृष्ठस्तोत्रादयः सामवेदे। एतस्यैते धर्मा इति नियामकस्य दुर्निरूपत्वाद्येन केनाप्यृत्विजा यः कोऽपि धर्म इच्छया संगच्छत इति चेत्| मैवम्| हौत्रमाध्वर्यवमौद्गात्रमिति समाख्यानेन नियतिर्बोध्यते । न च समाख्यानस्य बाधकं किंचित् पश्यामः। तस्मादबोधकत्ववाधितत्वयोरप्रामाण्यकारणयोरभावात् श्रुति- लिङ्गादिपञ्चकवत् प्रमाणेन समाख्यानेन धर्मा व्यवस्थाप्यन्ते॥

**कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाम द्वितीयकाण्डे षष्ठप्रपाठक एकादशोऽनुवाकः॥**